शुद्धे च तैलं लवणारुणीयं
विडङ्गपाठारजनीविपक्वम् ॥
मेदः समुत्थे तिलकल्कदिग्धं
दग्ध्वोपरिष्टाद्द्विगुणं पटान्तम् ।
हुताशतप्तेन मुहुः प्रमृज्या-
च्छोहेन धीमान् दहनं हिताय ॥
प्रलिप्य दार्व्वीमथ लाक्षया वा
प्रतप्तया स्वेदनमस्य कार्य्यम् ।
निपात्य वा शस्त्रमपोह्य मेदो-
दहेत् सुपक्वन्त्वथवा विदार्य्यम् ॥
प्रक्षाल्य मूत्रेण तिलैः सुपिष्टैः
सुवर्च्चिकाद्यैर्हरितालमिश्रैः ।
ससैन्धवैः क्षौद्रघृतप्रगाढैः
क्षारोत्तरैरेनमभिप्रशोध्य ॥"

इति सुश्रुते चिकित्सितस्थानेऽष्टादशेऽध्याये ॥)

ग्रन्थिकं, क्ली, (ग्रन्थिभिः कायति प्रकाशते इति । कै + कः ।) पिप्पलीमूलम् । (अस्य पर्य्याया यथा,
"ग्रन्थिकं पिप्पलीमूलमूषणं चटकाशिरः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) ग्रन्थिपर्णम् । गुग्गुलुः । इति मेदिनी । के । ६ ॥

ग्रन्थिकः, पुं, (ग्रन्थिभिः पर्व्वभिः कायतीति । ग्रन्थि + कै + कः ।) करीरः । (ग्रन्थिना कौटिल्येन कायतीति । कै + कः । यद्वा ग्रन्थः पञ्जिकास्यास्तीति ठन् ।) दैवज्ञः । (यथा, महाभारते । १४ । ७० । ७ ।
"तत्र मल्ला नटाश्चैव ग्रन्थिकाः सौख्यशायिकाः ।
सूतमागधसङ्घाश्चाप्यस्तुवंस्तं जनार्द्दनम् ॥")
सहदेवाख्यपाण्डवः । इति मेदिनी । के । ८१ ॥ (नकुलश्च । इयमाख्या तु यदानेन छद्मरूपिणा विराटगृहे वासः कृतस्तदैव जाता । यथा, महाभारते । ४ । ३ । २ ।

नकुल उवाच ।

"अश्वबन्धो भविष्यामि विराटनृपतेरहम् ।
सर्व्वथा ज्ञानसम्पन्नः कुशलः परिरक्षणे ।
ग्रन्थिको नाम नाम्नाहं कर्म्मैतत् सुप्रियं मम ॥")

ग्रन्थितं, त्रि, (ग्रन्थ्यते स्म इति । ग्रथि + क्तः ।) ग्रथितम् । इत्यमरः । ३ । १ । ८६ ॥

ग्रन्थिदला, स्त्री, (ग्रन्थिर्द्दलेषु पत्रेषु यस्याः ।) मालाकन्दः । इति राजनिर्घण्टः ॥

ग्रन्थिदूर्व्वा, स्त्री, (ग्रन्थिबहुला दूर्व्वा । शाकपार्थिवादिवत् समासः ।) मालादूर्व्वा । इति राजनिर्घण्टः ॥

ग्रन्थिपर्णं, क्ली, (ग्रन्थिषु पर्णानि यस्य । ग्रन्थिप्रचुराणि पर्णानि यस्येति वा ।) वृक्षविशेषः । गाँठियाला इति भाषा ॥ तत्पर्य्यायः । शुकम् २ बर्हिःपुष्पम् ३ स्थौणेयम् ४ कुक्कुरम् ५ । इत्यमरः । २ । ४ । १३२ ॥ बर्हिःपुष्पम् ६ बर्हो ७ पुष्पम् ८ बर्हम् ९ शुकबर्हम् १० । इति तट्टीका ॥ स्थौणेयकम् ११ कुसुमपुष्पम् १२ गुल्यकम् १३ । इति रत्नमाला ॥ शिशिरोत्थम् १४ स्वारामगुच्छकम् १५ बर्हिः १६ शुकपुच्छम् १७ शुकच्छदम् १८ । इति ग्रन्थान्तरम् ॥ ग्रान्थिकम् १९ काकपुष्पम् २० नीलपुष्पम् २१ सुगन्धम् २२ तैलपर्णकम् २३ । अस्य गुणाः । तिक्तत्वम् । तीक्ष्णत्वम् । कटुत्वम् । उष्णत्वम् । दीपनत्वम् । लघुत्वम् । कफवातविषश्वासकण्डूदौर्गन्ध्यनाशित्वञ्च । इति भावप्रकाशः ॥ अस्य लेपनगुणः । रूक्षतालक्ष्मीराक्षसज्वरनाशित्वम् । इति राजवल्लभः ॥

ग्रन्थिपर्णः, पुं, (ग्रन्थिः पर्व्व तत्प्रचुराणि पर्णान्यस्य ।) चोरकनामगन्धद्रव्यम् । इति राजनिर्घण्टः ॥ (चोरकशब्देऽस्य गुणादयो ज्ञेयाः ॥)

ग्रन्थिपर्णा, स्त्री, (ग्रन्थिपर्ण + टाप् ।) जतुकालता । इति राजनिर्घण्टः ॥

ग्रन्थिपर्णी, स्त्री, (ग्रन्थिपर्ण + गौरादित्वात् ङीष् ।) गण्डदूर्व्वा । इति राजनिर्घण्टः ॥

ग्रन्थिफलः, पुं, (ग्रन्थियुक्तं फलमस्य ।) शाकुरुण्डवृक्षः । कपित्थवृक्षः । मदनवृक्षः । इति राजनिर्घण्टः ॥

ग्रन्थिमत्फलः, पुं, (ग्रन्थिरस्यास्तीति मतुप् । ग्रन्थिमत् पर्व्वविशिष्टं फलं यस्य ।) लकुचः । इति राजनिर्घण्टः ॥

ग्रन्थिमान्, [त्] पुं, (ग्रन्थिरस्त्यस्यास्मिन् वा । ग्रन्थि + मतुप् ।) अस्थिसंहारकवृक्षः । हाड़भाङ्गा इति हाड़जोड़ा इति च भाषा । तत्पर्य्यायः । अस्थिसंहारी २ वज्राङ्गी ३ अस्थिशृङ्खला ४ । अस्य गुणाः । वातश्लेष्मकृमिदुर्नामनाशित्वम् । अस्थियोक्तृत्वम् । उष्णत्वम् । सारकत्वम् । अक्षरोगपित्तकारित्वम् । रूक्षत्वम् । स्वादुत्वम् । लघुत्वम् । वृष्यत्वम् । पाचनत्वञ्च । इति भावप्रकाशः ॥ रत्नमालोक्तपर्य्याया राजवल्लभोक्तगुणाश्चास्थिसंहारशब्दे द्रष्टव्याः ॥ (ग्रन्थियुक्ते, त्रि । यथा, कुमारे । ३ । ४६ ।
"कण्ठप्रभासङ्गविशेषनीलां
कृष्णत्वचं ग्रन्थिमतीं दधानम् ॥")

ग्रन्थिमूलं, क्ली, (ग्रन्थिर्मूले यस्य ।) गृञ्जनम् । इति राजनिर्घण्टः ॥

ग्रन्थिमूला, स्त्री, (ग्रन्थिबहुलं मूलं यस्याः । शाकपार्थिवादित्वात् समासः ।) मालादूर्व्वा । इति राजनिर्घण्टः ॥

ग्रन्थिलं, क्ली, (ग्रन्थिर्विद्यतेऽस्य । ग्रन्थि + "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) पिप्पलीमूलम् । इति राजनिर्घण्टः ॥ आर्द्रकम् । इति शब्दचन्द्रिका ॥

ग्रन्थिलः, पुं, (ग्रन्थिरस्यास्तीति । "सिध्मादिभ्यश्च ।" ५ । २ । ९७ । इति लच् ।) विकङ्कतवृक्षः । बँइचि इति भाषा ॥ (पर्य्यायोऽस्य यथा,—
"विकङ्कतः स्रुवावृक्षो ग्रन्थिलः स्वादुकण्टकः ।
स एव यज्ञवृक्षश्च कण्टकी व्याघ्रपादपि ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥) करीरवृक्षः । इत्यमरः । २।४।३७, ७७ ॥ तण्डुलीयशाकम् । स्रुतावली । पिण्डालुः । चोरकनामगन्धद्रव्यम् । विकण्टकवृक्षः । इति राजनिर्घण्टः ॥ ग्रन्थियुक्ते त्रि । इति मेदिनी । ले । ८५ ॥ (यथा, आर्य्यासप्तशत्याम् । ५०० ।
"रोषिणेव मया सखि ! वक्रोऽपि ग्रन्थिलोऽपि
कठिनोऽपि ।
ऋजुतामनीयतायं सद्यः स्वेदेन वंश इव ॥")

ग्रन्थिला, स्त्री, (ग्रन्थिल + टाप् ।) भद्रमुस्ता । (भद्रमुस्ताशब्देऽस्या गुणादिकं ज्ञातव्यम् ॥) मालादूर्व्वा । गण्डदूर्व्वा । इति राजनिर्घण्टः ॥

ग्रन्थिवर्हो, [न्] पुं, (ग्रन्थिभिर्बर्हति वर्हते इति । वृह वृद्धौ + णिनिः ।) ग्रन्थिपर्णवृक्षः । इति शब्दचन्द्रिका ॥

ग्रन्थिहरः, पुं, (ग्रन्थिं कौटिल्यं हरति परकृतकुटिलतां कार्य्यजटिलतां वा विभेदयतीत्यर्थः । ग्रन्थि + हृ + अच् ।) अमात्यः । मन्त्री । इति त्रिकाण्डशेषः ॥

ग्रन्थीकं, क्ली, (ग्रन्थिभिः कायतीति । ग्रन्थि + कै + कः । निपातनात् दीर्घत्वम् ।) ग्रन्थिकम् । पिप्पलीमूलम् । इति द्विरूपकोषः ॥

ग्रस, उ ङ भक्षणे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-सकं-सेट् ।) रेफयुक्तः । उ, ग्रसित्वा ग्रस्त्वा । ङ, ग्रसते । हिमांशुमाशु ग्रसते । इति माघः । इति दुर्गादासः ॥

ग्रस, कि ग्रासे । इति कविकल्पद्रुमः ॥ (चुरां— पक्षे भ्वां-परं सकं सेट् ।) रेफयुक्तः । कि, ग्रासयति फलं लोकः । ग्रसति तव मुखेन्दुं पूर्णचन्द्रं विहाय । इमं ग्रहणे पठन्ति केचित् । इति दुर्गादासः ॥

ग्रस्तं, त्रि, (ग्रस्यते स्म इति । ग्रस + क्तः । "ग्रस्त विभाषा ।" ७ । २ । १५ । इति इड़भावः ।) लुप्तवर्णपदम् । असम्पूर्णवाक्यम् । सक्तम् । (यथा, रामायणे । २ । ४२ । १२ ।
"राज्ञो नातिबभौ रूपं ग्रस्तस्यांशुमतो यथा ॥")
खादितम् । इत्यमरः । १ । ६ । २० ॥ (आक्रान्तम् । यथा, याज्ञवल्क्ये । ३ । २४४ ।
"दीर्घतीव्रामयग्रस्तं ब्राह्मणं गामथापि वा ॥")

ग्रह, श ञ ग्रहणे । इति कविकल्पद्रुमः ॥ (क्र्यां-उभं-सकं-सेट् ।) श ञ, गृह्णाति गृह्णीते । इति दुर्गादासः ॥

ग्रह, क कि आदाने । इति कविकल्पद्रुमः ॥ (चुरां-पक्षे भ्वां-परं-सकं- सेट् ।) क, अजग्रहीत् अग्रहीत् । कि, ग्राहयति ग्रहति । एष क्रादिरेव मन्यते तत्राप्यात्मनेपदी एव । इति दुर्गादासः ॥

ग्रहः, पुं, (गृह्णाति गतिविशेषानितिण यद्वा, गृह्णाति फलदातृत्वेन जीवानिति । ग्रह् + "विभाषा ग्रहः ।" ३ । १ । १४३ । इति पक्षे अच् ।) सूर्य्यादिनव । यथा । रविसोममङ्गलबुधवृहस्पतिशुक्रशनिराहुकेतवः । (यदुक्तम्,—
"सूर्य्यश्चन्द्रो मङ्गलश्च बुधश्चापि वृहस्पतिः ।
शुक्रः शनैश्चरो राहुः केतुश्चेति नव ग्रहाः ॥"
"लोकानन्तीन् स्वरान् धातून् मुनीन् द्वीपान्
ग्रहानपि ।
समिधः सप्त सप्ताशाः सप्तजिह्वा हविर्भुजः ॥"